नं० ४३-६५-घ

आपस्तम्बीयाधूरतंत्रस्वतंत्रव्याख्या प्रयोगरत्न-माला चतुर्थप्रश्नः (पूर्ण

नं० ५२९५-घ

पत्राणि १२

श्रीगणेशायनमः॥ श्रीसरस्वत्यैनमः॥ योवेदवपुराचारावयवोदर्शिनेंद्रियः। मामीरयंन्नंतरास्तेतंविज्ञानंगुरुंभजे॥१॥ कर्मब्रह्माध्वनीन-
स्यमंत्रिभूपतिभूपतेः। व्याख्याग्निहोत्रप्रश्नस्यविष्णुभट्टेनतन्यते॥२॥ अग्न्याधेयानंतरंअग्निहोत्रंव्याख्यासुरधिकारंदर्शयति। अग्नि-
होत्रंव्याख्यास्यामः। अग्निहोत्रशब्दः कर्मनामधेयं। अग्नेर्होत्रोत्रमस्मिंन्निति प्रथमदेवतासंबंधात्। यथोक्तंब्राह्मणे। सएतन्द्रागधे-
यमभ्यजायत। यदग्निहोत्रं। तस्मादग्निर्होत्रमुच्यत इति। कचिद्रूपवाचिनोपि। यथा अधिश्रित्याग्निहोत्रं। यस्याग्निहोत्रंदुह्यमानमभि-
स्यादेौ। अधिवृक्षसूर्य आविः सूर्येवा। धृष्टिरसिब्रह्मयच्छेत्युपवेषमादायगार्हपत्यमभिमंत्रयतेसुगार्हपत्यइति। यस्यवोभावनुग-
तौयस्यवाग्निभिः रवी नित्यादिवत्समुच्चयार्थोवाशब्दः। सूर्यशब्देनोभयत्रापिरश्मिलक्षणा। सायंभूमेरुत्थितारश्मयोधिवृक्षेम-
वयस्मिन्कालेनिविशंतेसोधिवृक्षसूर्यः। तथाप्रातः प्राच्यांदिशिरश्मयः आविर्भूताः यस्मिन्काले सः आविः सूर्यः। तयेममर्थ-
मभिप्रेत्योक्तं। उद्यत्सूरश्मिपुदग्नहोत्रेति। केचितविः सूर्यइतिसायंविहरणकालस्यैवकालविकल्पंमन्यंते। तदयुक्तं। प्रातर्विहरणका-
लस्यवक्तव्यत्वात्। अनेनवनदवगमात्। अतोन्यस्यावचनात्। अन्यथाप्रातर्विहरणकालस्यानियतकालत्वप्रसंगात्। नचास्त्विति
वाच्यं। उदयातिक्रमेप्रायश्चित्तविधानात्। अतएवनहिप्रायश्चित्तवचनात्कालविशेषोवगम्यत इति चेत्। समानमिदं। सायंवि-
हरणेपिनेतत्रापिकालोप्यविधेयस्यात्। तस्माद्यथोक्तएवयुक्तः सूत्रार्थः। नचिद्युदसीत्यपामुपस्पर्शनं। दर्विहोमात्मकत्वात्। उप

वेषस्तु प्रागेव व्याख्यातः। धृष्टिरसीति दर्शपूर्णमासयोर्व्याख्यातः। सुगार्हपत्यइत्याधाने। अथैनं बोधयत्युद्बुध्यस्वाग्नेस्मिन्त्सधस्थेति। बोधय
ति। प्रादुष्कुरु इति। स्वतः प्रबुद्धेऽपि मंत्रोच्चारणमेव। अग्निस्त्रिष्टुप्। उद्बुध्याग्ने प्रतिजागृह्येनमिष्टापूर्ते सं सृजेथामयं च। तस्मिन्सधस्थे अध्युत्त
रस्मिन् विश्वेदेवा यजमानश्च सीदत। हे विश्वेदेवाः पूर्वं यजमानश्चास्मिन् पुरोवर्तिनि सधस्थे अग्निना सहस्थातुं योग्ये अध्युत्तरस्मिन् अधिक
मुत्कृष्टे स्थाने सीदत। संविशन्तां। शेषं दर्शपूर्णमासप्रायश्चित्ते व्याख्यातं। उद्धरेति। वसायमाह यजमानः उद्धरेति प्रातः उद्धरेति - - - - वैचि
त्र्यार्था। सायंप्रातः श्रोद्धरेत्याहेत्यर्थः। तत्रोद्धरेति अनुज्ञामात्रं यजमान आह। न तावन्मंत्रणमध्वर्युरित्येवकारार्थः। यद्यपि स्वयमुद्धरेदपि स्वयमा
त्मानमनुजानीयादिति न्यायेनोद्धरेत्येवाहेत्यर्थः। तत्रैव भिन्नक्रमो वा योजनीयः। उद्धरेत्याहेत्येवेति सहस्रं तेन कामदुघोऽवरुंधे। तदुक्तेनानु
ज्ञाविषयोद्धरणपरामर्शद्वारेण लक्षितलक्षणया अग्निहोत्रं परामृश्यते। यस्तु तेन च तदग्निहोत्रेण सहस्र हस्रं कामदुघा गाः अवरुंधे लभ
त इति तथा च श्रुतिसूत्रे ह स्पष्टं व्याचष्टे बौधायनः। अथ यदस्याग्निहोत्रमुद्धरति सहस्रं तेन कामदुघोऽवरुंधे इति। अथ यदस्याग्निहोत्र
मुद्धरति सहस्रमपरिमितमित्येवेदमुक्तं भवतीति। वाचा त्वा० रुद्धरामीति गार्हपत्यादाहवनीयं ज्वलन्तमुद्धरति प्रजास्येनोद्धरति। ज्वलं राम
तमिति लिंगात्। वामदेव यजुः। वाचा त्वा होत्रा प्राणेनोद्गात्रा चक्षुषाध्वर्युणा मनसा ब्रह्मणा श्रोत्रेणाग्नीधैतैस्त्वा पंचभिर्दैव्यैरृत्विग्भिरु १
द्धरामीति। हे आहवनीय त्वामुद्दिश्य होत्रादिरूपैर्वागादिभिः पंचभिर्दैवैः संवर्धितैरृत्विग्भिस्त्वामुद्धरामि। भूर्भुवः सुवरुद्ध्रियमाण०

नैमित्तिके षु तन्त्राधिकारिसंस्कारितान्। पूर्णमास एव न दर्शइत्तिके चिन्। चकाराल्लोम नखव पह इत्येके वाजसनेयमतानुत्तदेवाह त्वमि
त्याह अप्यल्पशो लोमानि वापयत इति वाजसनेयकं। लोमानि तनूरुहाणि तान्यल्यान्यपि वापयितव्यानि केशश्मश्रू त्वल्पं स उपे
क्षतामति भावः। यद्वाल्पशो लोमान्यपि वापयितव्यानि केशश्मश्रू अत्र सुतरामित्यर्थः प्रकृतमेव वा श्मश्रू लोमशब्देन विवक्षि
तं लोमविषशेषत्वाछ्मश्रूणः। यथाहुर्नैघंटुकाः तनूरुह रोम लोम तद्वृद्धौ श्मश्रु पुमुखइति तदयमर्थः। केशश्मश्रू पुमध्ये
श्मश्रु ल्पमपि वापयत एव केशाः स्वल्पास्वल्पा संतो नोप्येरन्निति बौधायनश्चाह १ यद्वा केवलं श्मश्रू वापयिष्यमाणस्यादि।
तिविद्युदसि० उपैमीतिपक्ष्यमाणोप उपस्टशतियक्ष्यमाणयष्टुं कृतसंकल्पः संकल्पश्च मनसो साधारणव्यापारत्वान्मानसः
यथाहुः सांख्याः मनः संकल्पमिति वा चिकोपीत्यपरं। यो यक्ष्य इत्युक्तानयजत इति लिंगात् मनसा त्रिः संकल्पयति वा चात्रि
रुच्चैरिति बौधायनवचनाच्च तत्र क्रतुकामोपि कामयितव्यः। यथा वक्ष्यति क्रत्वादौ क्रतुकामं कामयितयज्ञांगादौ यज्ञांगकाम
मिति। तत्र कामा श्रोक्ता बौधायनेन। यथा सर्वकामो ग्नीनाधास्य इत्यग्न्याधेये स्वर्गीकामो दर्शपूर्णमासाभ्यां यक्ष्य इति दर्शपूर्ण
मायोः स्वर्गकामः पशुना यक्ष्य इति पशुबंधे स्वर्गकामः सोमेन यक्ष्य इति स्वोमे स्वर्गकामो ग्निं चेष्य इत्यग्निंचयन इति असति
तु कामे कामशद्बो लुप्यते। सत्यविवावर्जनं तद्धि परमं श्रेयः परदेवताप्रीणनं परस्मै च निश्रेयसायेति सर्वशास्त्रमर्यादा यथोक्तंम

भगवद्गीतासु।कार्यमित्येवयत्कर्मनियतंक्रियतेऽर्जुन।संगंत्यक्त्वाफलंचैवसत्यागःसात्विकोमतइति।सूत्रकारश्चाहानेमंलौकिक
मर्थंपुरस्कृत्यधर्मंश्चरेदिति।तथाधर्मंचर्यमाणमर्थाअनूत्पद्यंतइतिच।श्रुतिश्च।कामानुपहतस्यांनंदानुपदिशतिश्रोत्रि
यस्यचाकामहतस्येति।तस्मादग्नीनाधस्यपौर्णमासेनयक्ष्यइत्येतावानेवयुक्ततरः।संकल्पःसचोपस्पर्शनंचकालभेदात्त्र
योगभेदाच्चदर्शेष्वावर्त्तते।तदिदंसर्वयज्ञेषुपस्पर्शनंभवतितदिदमयामुपस्पर्शनंनकेवलंदर्शपूर्णमासयोःकिंतुसर्वेष्वे
वयजतिचोदनेष्विष्टिपशुसोमेषुभवतियक्ष्यमाणोवेष्मावेतिश्रुतेः।अतश्चदर्वीहोमेषुनभवतियक्ष्यमाणोपस्पर्शनीत्यु
क्तासर्वयज्ञेष्वितिपूनर्विधानात्।होष्यन्नपउपस्पृशेदितिश्रुतेश्चा।दर्विहोमेष्वपिभवतीतिकेचित्।मंत्राणामर्थस्तक्तएवय।
स्यतुनोक्तस्तस्यनुवक्ष्यते।अग्निंगृह्णामिइतियथालिंगमाहवनीयेन्वाधीयमानेजपतिसद्यस्कालायांपौर्णमास्यामा
घालुप्यते।श्वोयज्ञायेतिलिंगविरोधात्।तथातृतीयापंचदशीमितिलिंगविरोधात्।यत्रतल्पापिपंचदशीस्यात्तदाको राम
पस्तृतीयस्याःविकृतिषुयथार्थमूहः।सर्वत्रःयथाअग्नपज्ञायइमामूर्जंप्रथमामित्यादि।तथानामविकृतीष्विष्टिषुतेन २
तेननाम्नोपलक्षणंयथाचैत्रंहविरागयणीयंहविरित्यादि।अनामवतीषुसामान्यनाम्नोपलक्षणंयथाऐष्टंहविरि
ति।अंतराग्नीमनीषेत्यंतराग्नीतिष्ठंजयति।अंतराग्नीगार्हपत्याहवनीयौइहप्रजाःमनीषयेतिगार्हपत्यमयंपितृणां·कर

दितिदक्षिणाग्निं अहरहः शरदः शतमितिसभ्यमन्नमावसथीयं नियच्छतित्यावसथ्यं। सर्वान्वाधीयमानमुपतिष्ठतइतिशेषोऽ
नुमंत्रयतइतिवा। इदमहं प्रब्रवीमीत्यन्वाहितेषुजपति। अत्रान्वाधीयमानइत्युपलक्ष्य पंचानामग्नीनांयाजमानेयुक्तान्तेवा
चाहितेष्वित्युपसंहारात्। सभ्यावसथ्ययोराध्वर्यवे अनूक्तामप्यस्ति। तूष्णीमन्वाधनंमित्यवगंतव्यं। मंत्रवर्णाश्च भवन्ति। वि
जयमागं समिधतामितिअचाहितजपस्यान्वाधानांगत्वात्तद्रहितासुप्रायणीयाग्दिष्वभावः। पयस्वतीरोषधयइतिपु
रावर्हिषि आहर्तोर्ज्यांयापती अश्रीतः पुरावत्स्यानामपाकर्तोरमावास्यायां आहर्तोराहरणात्तथापाकर्तोरितिकालल
क्षणाचेयं तेन यदा पौर्णमास्यामन्वाधानपरिस्तरणोपवासा एवं क्रियंते यदाचामावास्यायां न संनयते तदाशंखचै।
लान्यायेनानयोः कालयोरश्रीतः प्राकपरिस्तरणानां बर्हिषांचाहरणम्। असिदादानस्य बर्हिराहरणांगत्वाच्छाखाछेद
नस्यचवत्सापाकरणांगत्वात् पौर्णमास्यामसिदादानादमावास्यायांशाखाछेदनात्प्रागित्येके प्रथमप्रयासे चोभयामंत्रस
मुच्चयश्चयजमानस्य प्राणाहुतिमंत्रेण प्रथमस्यप्राणाहुतिमंत्रस्यलोपइत्येके। सर्वमंत्रप्रत्याम्नायोमंत्रइतिसर्वेषांलो
पइत्यन्येस्वयंचार्थप्राप्तस्याशनस्यकालनियमः। तेनसद्यस्कालासवसत्यांक्षुधिनेष्यते। पौर्णमास्यायोपवसथ्यं। तौनातिसु
हितानवतः। उपवासप्रागेवव्याख्यातः। नंरात्रौकरिष्यंतावहरपिनातिसुहितौनातिनृप्ताभवतः। नृप्तिश्चान्नस्येतित्यस्यपवा

दः।अमाषममांसमाज्येनाश्नीयाताततदभावेदध्नापयसावा।माषमांसयोरभ्यवहार्ययोर्व्यंजनार्थयोअप्रतिषेधः।आज्यादीनितूपसेके नियं
म्यतेमाषशब्दोमुद्गादेरपिकोशधान्यस्यप्रदर्शनार्थः।आप्राशानिकादितिलिंगात्बौधायनस्त्वाहसर्वमेतदहः कोशधान्यंवर्जयेदन्य
त्रतिलेभ्यस्तस्यब्राह्मणंप्रतिपाद्याश्नीयादितितथापत्न्याएवैतदहरुच्छिष्टंदद्यादितिच।बर्हिषापूर्णमासेव्रतमुपैतिवत्सैश्चप्राकृते।
3 घमावास्यायांअत्रापिबर्हिर्वत्सशब्दापूर्ववतूभ्यांकाललक्षणा।बर्हिषाऊयमाणेनसत्तेतिशेषः।प्रणीतासुप्रणीयमानासुसन्ने
षुवाहविष्णुर्व्रतमुपैतीत्युभयत्रसाधारणं।उभयत्रोभयोःपौर्णमास्यमावास्ययोःसाधारणमिदंकालद्वयंनतुसन्निहितामावास्यामा
त्रसंबंधीत्यर्थः।अशनमग्न्यअन्वाधानंव्रतोपायनमित्येकेव्रतोपायनमशनमग्न्यन्वाधानमित्येकेग्न्यकेन्वाधानंव्रतोपायनम।
शनमित्येके।त्रयएतेक्रमविकल्पाः।त्रयाणामर्थ्यंकर्मणांयथोक्तेनसहचलारस्तत्रयदाप्यशनंपूर्वंतदादिप्रणयनात्परमेवअ
न्वाधानस्यैवक्रमनियमात्व्रतप्राथम्यप्येवमेवप्रथमद्वितीयचतुर्थपक्षेषुसकालयेवव्रतोपायनंतत्रयदाव्रतोपायनेमंत्यंतदा राम
प्रणीताप्रणयनंहविरासन्तिपक्षौचतुर्थेपूर्णमासेअलंकरणानंतरमशनंदर्शेतुपिंडपितृयज्ञानंतरमितिविषेकः।पयस्वतीरो ३
षधयइत्यपआचामतिभक्षयति।तदाशुध्यर्थमप्याचमनंभवति।अपरेणाहवनीयंदक्षिणातिक्रामति।व्यक्तं।एषएवातऊर्ध्वं
यजमानस्यसंचरोभवति।शास्त्रीययोर्निर्गमनप्रवेशनयोरेषएवपंथादक्षिणेनाहवनीयमवस्थायव्रतमुपैष्यन्नमुद्रंमनसा।

ध्यायन्ति। व्रतमुपयन्तीति कल्पान्तरकारमतनिराकरणार्थमुक्तं व्रतमुपैष्यन्निति। ध्यानं च। पृथिवीं मनसा ध्यायतीतिवदनुसंधेयं। अथ जप
ति अग्ने व्रतपते व्रतं चरिष्यामिति। ब्राह्मणो वायो व्रतपत आदित्य व्रतपते व्रतानां व्रतपते व्रतं चरिष्यामीति राजन्यवैश्ययो राजन्यवैश्य।
योरेकैकस्य त्रयोपि मंत्राः। अथशब्दो ध्यानानंतरमर्थकृतस्याचमनादेः प्रतिषेधार्थः। पयस्वतीरित्याद्युपस्थानं सांगं व्रतोपायनं
एतत्सर्वमंगं अत ऊर्ध्वं संकल्पपूर्वकं सत्यवादी त्वयं इतिकेचित्। सर्वान्वा ब्राह्मणः। व्यक्तं। अथादित्यमुपतिष्ठते सम्राडसि राध्यासमि
ति अत्राह बोधायनः। उपनिष्क्रम्याग्न्यागारादादित्यमुपतिष्ठत इति बोधायनो नैव तिष्ठन्तीति शालीकिरिति १ यद्यस्तमिते व्रतमुपे
यादाहवनीयमुपतिष्ठन्नेतद्यजुर्जपेत्। गृहमेधीयाद्यर्थवचनं उभावग्नी पश्यूनीति। सायं परिस्तीर्यमाणे स्रुजपति उभाविति लिंगा
त्। ब्राह्मणोक्ताग्निद्वयपरिस्तरणविषय एवायं मंत्र इति केचित्। येनदपुक्तं। परिस्तीर्यमाणेष्विति वचनात्। प्रधानाग्निद्वयाभि।
धानोपपत्तेश्च यथा वहुष्वागतेषु वसिष्ठ वामदेव वागतावितिति। आरण्यं सायमाशेश्चात्य माषममांसं अरण्ये भवमारण्यं नैवा
रादितत्सायमाशनस्थाने श्नातीति माषमांसप्रतिषेधः पूर्ववत् माषाश्चारण्याः माषशब्दोत्रापि पूर्ववद्व्याख्येयः अश्नातीत्यकच
चनादारण्याशनं पत्न्या न ष्यते। भरद्वाजेने विष्टा एवात्मसंस्कारात् तस्याः अपि वा काममामागोदा मधुना आप्राशातीति कात्। मार्गो
मृगविकार मांसं प्राशातीति कं कोशधान्यं यस्मान् प्रशातने वो ध्रीयते तदयमर्थः। परिगणितेषु मुन्यन्नेषु मृगमांसपर्यतं मांसं धु

पर्यंतं रसं प्राश्नाति प्राशातिकां तंधान्यं सतिकामे श्नीयान्न ततः पराणीति मधुनस्तु प्रतिषेधस्याप्य प्रत्यक्षसामान्यादेव प्रायो निवृत्तिः
स्यादिति प्रतिप्रसवः। अपो वा अश्नातीत्यर्थः। न वा किंचित्। व्यक्तं। न तस्य सायमश्नीयाद्येन प्रातर्यक्ष्यमाणः स्यात् यज्ञातीये न हवि
षाश्नीयष्टात् जातीयं द्रव्यं नाश्नीयात् तत तश्च सायमाशेनाज्योयसेकः न च दर्शे सन्नयतो दधियवोभ्यां तथा अनुपवसथ्योष्टिपशु
पुश्नोभाविषु तत्तत्साधनद्रव्याशन निवृत्तिः येन प्रातर्यक्ष्यमाण इति सामान्यतो निर्देशात् पुनः सायंग्रहणाच्च। आरण्यायोपवसन्न
योश्नाति न वा। आरण्ये नैव हविषाय श्नीयष्टास्तस्य नास्त्यारण्याशनं तदा तिमामेव कल्पो व्यवतिष्ठते त्यर्थः। वानप्रस्थार्थमिदं
वचनं इतरेषां व्रीहियवविधानात् तस्यारण्यानियमाच्च यथा तस्यारण्ये नैवातऊर्ध्वं होम इति विकृत्यर्थं वा वचनं। यत्रारण्यं हविर्य
थागामुर्वंतं चरुं निर्वपेदित्यादौ तदा त्विदमेव वचनं ज्ञापकं भविष्यति। सोपवसथा अपि विकृतयो ऽभ्यं तद् इति बोधायनश्चाहाइष्टिपशु
बंधाः सोपवसथाः सर्वोयज्ञा वेति अन्ये तु प्रकृताविव व्रीहियवादिमुख्यलोपे तीवाराद्यारण्येय प्रतिनिहिते मुख्यधर्मत्वेन ग्या।
म्योपवासस्यैव प्राप्तौ तदर्थमिदं वचनमिति। जंजभ्यमानो ब्रूयान्मयि दक्षक्रतू इति। कर्ममध्ये यदा जंजभ्यते जृंभते तदा प्रायश्चि राम
त्तार्थमेतद्यजुर्जपेत्। प्राजापत्यं यजुः। प्राणापानरूपौ दक्षक्रतू मय्येवास्तां न जंभणेन बहिर्निर्गच्छतामित्यर्थः। अमावास्यां रात्रिं ४
जागर्ति। व्यक्तं। अपि वा सुप्यादुपरि तेवन शायीत। जागरणाशक्तो सुप्यात उपरिशयनमेव वर्जयेत्। अपि वोपरिशायी तव्रत।

चारीतेवस्यात्।उपर्य्यपिवाशय्यीनसर्वथापितावत्ब्रह्मचार्येवस्यादित्यर्थः।विहितस्यब्रह्मचर्यस्यपुनर्विधानंप्रायश्चित्तगौरवा
र्थंउभयत्रजागरणमेकेसमामनंति।उभयत्रामावास्यायांपौर्णमास्यांच।आहवनीयागारेगार्हपत्यागारेवाशेते।अन्यदाहवनी
यागारमन्यद्गार्हपत्यागारमितिवक्ष्यति।तयोरन्यतरस्मिन्शेते।देवादेवेषुपराक्रमध्वं०प्रावतंयुवमितिजपिताश्वोभूतेब्रह्माणं
वृणीतभूपते०वृणीमहइति।ब्रह्मत्वंविधानेचोक्तस्यब्रह्मवरणस्यानेनकालउच्यतेश्वोभूतेप्रक्रांतेतंत्रेकॢप्तेचब्रह्मासनेदेवादे
वेष्वितिजपितानंतोब्रह्माणंवृणीतेनचायंजपोब्रह्मवरणशेषकर्मशब्दःप्रार्थनार्थत्वात्।अतःप्रायणीयादावपिपरिस्तरण
ऐत्तरकालंभवति।केचिज्जपितेत्यंतंपूर्वग्रंथेनयोजयंतिजपिताशेते।ततश्वोभूतेब्रह्माणंवृणीतेभूपतइतिअपरेणाहवनी
यंदक्षिणातिक्रम्योपविशत्ति।ब्रह्माणंवृत्वातेनसहातिक्रम्ययजमानउपविशतिपूर्वोब्रह्मापरोयजमानः।पूर्वापरत्वेदेश
तःकालतश्च।भूश्चकश्चयज्ञमारभइति।प्रणीताःप्रणीयमानाअनुमंत्रयते।चत्वारएतेमंत्राः।तथाचयजमानहविर्निर्वप्स्या
मीत्युच्यमाने ॐ निर्वपेत्यनुजानाति।उच्यमानउक्तइत्यर्थः।आमंत्रणानंतरंकार्यत्वादनुज्ञायाः।अग्निंहोतारमिहतंहुवइ
तिहविर्निरूप्यमाणमभिमंत्रयते।प्रतिहविरभिमंत्रणावृत्तिःहविषोभे।एकवचनान्निरूप्यमाणमितिवर्त्तमाननिर्देशाच्च।क्रि
यांतराव्यवायाद्धविरनकेष्वपिसकृदभिमंत्रणमित्येके।हविर्निर्वपणंवापात्रमभिमृशतीत्यथाभिमंत्रयते।निरूप्यतेयेस्मिन्पा

नैतन्निर्वपणं तस्यादौ सकृदभिमर्शनमभिमंत्रणं वा। पात्रसंस्कारत्वात्तस्य चैककर्तृता तत्तद्दितावाचंयमत्वं तिपूर्वेह्यध्वर्युयजमानयोः शाखांत
रीयत्वाद्धाग्यमेन काल उक्तः प्रणीयमानासु वाचंयमत्वं तद्वत्ति इदानीं तु स्वशाखास्थः कालस्तेन विकल्प्येते यजमानस्य। तदितिचेना क्यादि
सामान्यरूपविवक्षयापि नपुंसकनिर्देशः। अथ यज्ञं युनक्ति अथ शब्दः कर्मांतरं त्वद्योतनार्थः। तेनानौषधतंत्रास्वपि उपसदादिषु
यज्ञयोगः कार्यः। औषधकांड पाग मंत्रस्याथ शब्दस्य चार्थकृत्य निरासार्थं तेनाप्युपपत्तेरौषधतंत्र एव यज्ञयोग इत्यन्ये। कोयं
5 यज्ञयोगो नामतमाह। कस्त्वा युनक्ति स त्वा युनक्ति इति सर्वं विहारमनुवीक्षते। विहारमनुवीक्ष्य तद्वत्ये वसिद्धेः सर्वं विहार इति वचनात्
विहारस्यैवानुवीक्षणं न पात्राणामिति केचित्॥ छ॥ यज्ञयोगांताधिकारितंत्रव्याख्यासुगंधिभिः। सूक्तिप्रसूनैः पुष्णातु पुमर्थान्पुरु
षोत्तमः॥ छ॥ इति प्रयोगरत्नमालायां चतुर्थप्रश्ने प्रथमः पटलः॥ कर्मब्रह्माध्वनीनस्य मंत्रिभूपतिभूपतेः। व्याचष्टे चौडपाचार्यो वे
द्यांदीयाजमानकं। चतुः शिखंडा० कामानिति वेदिं संमृज्यमानां। अनुमंत्रयत इति शेषः यामात्ददा० छिन्नभीतिस्तंबयजुर्हीयमाणं राम
स्तंबयजुषां द्रव्याणामावृत्तिर्यथा तथा मंत्रावृत्तिः चतुर्थस्य तु हरणस्य तूष्णीकत्वान भवत्यनुमंत्रणं। स्तंबयजुर्हीयमाणमित्य विशेषव ५
चनात्छिन्नभीति लिंगाच्च तस्याप्यस्यानुमंत्रणमित्येके। इदं तस्मै० मानुषीभिस्तु कर मभिगृह्यमाणं। अभिग्रहणस्य तु चतुर्थस्या
प्यतूष्णीकताद्रवसे वानुमंत्रणं। यज्ञस्य त्वा प्रमया भि० गृह्णामीति वेदिं परिगृह्यमाणं। उभयोः परिग्रहयोरनुमंत्रयते अविशेषा

नूर्वंचोत्तरंचेतिभरद्वाजवचनाच्च। यदुद्धंतः॰ भुवनेमिरस्त्वितिउद्धन्यमानां। भूमिर्भूता॰ शक्करीश्वेनिक्रियमाणांवेदिमनुमंत्रयतइत्य
र्थः। ईडेन्यक्रतूः॰ अपस्वरीरितिप्रोक्षणीरासाद्यमानाः। ऊर्णामृदु॰ परंव्योमन्नितिबर्हिरासाद्यमानं। व्यक्तं। अग्निराज्यं॰ संविदा
नाइत्याज्यंप्रोक्षणीश्चोत्सूयमानाः। आज्यमुसूतं॰ प्रोक्षणीश्चोत्सूयमानाइत्यर्थः। उभावाज्यग्रहांजपतः। उभावितिवचनमध्व
र्युणासहप्रयोगार्थंयाजमानाध्वर्यवकांडयोः संकीर्तनादमीष्वं। अध्वर्योरपिर्चातुस्वर्यप्राप्त्यर्थमित्येके। अस्तिश्रेमू॰ अद
ब्धाइत्यंतर्वेदिबर्हिरासन्नं। अनुमंत्रयतइतिशेषः। चतुःशिखंड॰ पिन्वस्वेतिस्तीर्यमाणाः। नात्रधातौधातौमंत्रावृत्तिः स्तीर्य
माणायावेदेरेकत्वात्तदभिधायित्वान्मंत्रस्यच। ध्रुवोसीत्येतैः प्रतिमंत्रंपरिधीन्परिधीयमानान्। अस्मिन्यज्ञउपभूयन्नुदात्ता
इतिच अस्मिन्यज्ञदत्यनयातुसकृदंतेनुमंत्रणंपरिधीन्दधामीतिलिंगात्। अस्मिन्यज्ञइतिसर्वानितिभारद्वाजवचनाच्च। युन
ज्मिताब्रह्मणादैव्येनेत्याहवनीयंनेजिष्ठाते॰ पिशाचाइतिवानुमंत्रयते। उपतिष्ठतइतिवायुनज्मीतिप्रतीकेनध्रुवस्येवग्रहणं
नव्याहृतीनांमपितासामग्निहोत्रोपसादनादौविनियोगात्। व्यक्तवचनाच्च। कर्म्यांतरेषुपरिध्यंगमिदमनुमंत्रणंतत्सन्निधा
वाम्नानान्। युनज्मिताब्रह्मणादैव्येनेत्याहैषवाअग्नेर्योगइतिश्रुतेः पृथक्कर्मवेदमग्नियोगोनामेतिकेचित्। तन्मंदंपरिधियोग
स्यैवतत्राग्नियोगत्वेनाभिप्रेतत्वात्। यतःपारिधिविमाकस्यैवाग्निविमोकत्वंतदुक्तंब्राह्मणे। वितेमुंचामिरशनाविरश्मीनित्याहैष

वाऽग्ने विर्मोकइ इति व्याख्यातिवत्तन्तथा सूत्रकारः। वितेमुंचामीति परिधिषु विमुच्यमाने ष्विति व्यक्तोक्तं चैतत्सत्याषाढेन। पथायुन।
ज्मितायन्मे अग्नइ इति द्वाभ्यामग्निं परिधीयमानां तेजिष्ठा तइ इति परिधितमिति तिनस्माद् उपसद बभृथगृहमेधीयादिषु परिध्य
भावादनुमंत्रणाभावः। विच्छिनद्मि॰ मयि धारयतमिति विधृती साद्यमाने अनुमंत्रयतं इति शेषः। अयं प्रस्तरः॰ आध्यासादया
6 मीति प्रस्तरं साद्यमानं। अपि वा जुहूमेव प्रस्तर इत्यस्मिन्कल्पे इडां तसंस्थायां च लुप्येते मंत्रः। उत्तानुयाजानामिति स्रुच इति।
लिंगविरोधात्तथा प्रायणीयोदयनीययोरननुयाजप्रयाजयोर्यथार्थमूहः। अन्यतरस्य धर्त्तीधत्तीप्रयाजानां सदाधारेत्यादि
कदाचित्सर्वसादनयोग्यत्वेन संस्तवोपपत्तेः। सर्वत्रानिवृत्तिरनूह इत्येके। आरोह पथो॰ दैव्येनेति जुहुं अवाहं॰ दैव्येनेत्युप
भृतयेमा वाचा॰ दैव्येनेति ध्रुवां। स्योनो मे॰ दैव्येनेति स्रुचा मेयं स्थाली॰ दैव्येनेति स्थालीं। सर्वत्र साद्यमानानुमंत्रणं। तृप्ति
रसि॰ पशुभिरिति पुरोडाशानज्यमानान्प्रति हविरावर्तते मंत्रः। तृप्तिरसीत्येकवचनात्। अज्यमानानिति वर्त्तमाननिर्देशा
त्। यज्ञोसि पशुमतीरित्याग्नेयं पुरोडाशमासन्नमभिमृशति सर्वाणि वा हवींषि। यदा सर्वाणि तदावृत्ते मंत्रस्य यज्ञोसीति पु। राम ६
रोडाशाभिधानादेकवचनाच्च सर्वाणि हवींषीति चात्रैषामासादनमुत्तमायाध्वर्य्यवे चतुर्होत्रा पौर्णमास्यामित्यादिना। तेषामे
वग्रहणं नत्वाज्यानामपि कुतः स्थानात् आसन्नाभिमृशतीति वचनात्सर्वेषां हविषामुत्तराद्धीत् सर्वेभ्यो हविभ्य इडामित्या

दोतथादर्शिताश्च। तेनोपसदादावभिमर्शननिवृत्तिराज्यस्य सर्वाणि हवींषीत्यविशेषेणादानादाज्यानामपीत्येके यज्ञार्थताद्वीवस्येवेत्ये
न्ये। इदमिन्द्रियं अयतामिति प्रातर्दोहं यूस्रुपिथिवीधिनोतितिदधि। आसन्नमभिमृशतीत्यन्वयः। अयं यज्ञः अस्यामिति सर्वाणि
हवींषि हविष्मानयं यज्ञ इति यज्ञाभिधानान्नावृत्तिर्मन्त्रस्य तथा च भरद्वाजः सर्वाणि समस्तान्यभिमृशति ममाग्ने वर्चो विहवेष्वस्त्वि
त्यनुवाके नायं यज्ञ समसदद्ध विष्मानिति चेतियोनः कनीयः र्वविदेयेत्यैन्द्राग्नं उहेनाभिमर्शनं वैमृध्रः स्यापि ममाग्ने वर्चो विह
वेष्वस्त्वित्यनुवाकेन सर्वाणि हवींष्यासन्नान्यभिमृशेद्दष्टाभिर्वाव्याख्यातं पूर्वतरेण च तुर्होत्रा पौर्णमास्यां हवींष्यासन्नान्यभि
मृशन्ते प्रजाकामः पंचहोत्रामावास्यायां स्वर्गकामः पूर्वैरस्य समुच्चयः कामनायां नित्यवदेके समामनन्ति त्यर्क्कं॥ ॥ इत्यासं
न्नाभिमर्शांतया जमानसुगंधिभिः। सूक्तिप्रसूनैः पुष्णातु पुमर्थान्पुरुषोत्तमः॥ ॥इति प्रयोगरत्नमालायां चतुर्थे प्रश्ने द्विती
यः पटलः॥ ॥ कर्मब्रह्माध्वनीनस्य मंत्रिभूपतिभूपतेः। व्याचष्टेचौंडपाचार्य इध्मनोदीपतिक्रियां। दशहोतारं वदेत्पुरस्तात्सा
मिधेनीनां त्यर्क्कं। अंगिरस अवेंब्ति तिसा सामिधेनीनां प्रतिपदिजापति। प्रतिपदि प्रथमायामृचि आरंभेवा। अनन्यमानासुद
शहोतारं व्याख्यायो क्षुध्मोग्न इति समिध्यमानं समिद्धो अग्निरिदं नममेति समिद्धं। अनुमंत्रयत उपतिष्ठते वा अत्र समिध्यमा
नवती समिद्धवती व्यामुपलक्षितस्याग्ने रिदमनुमंत्रणं दशहोतुर्व्याख्यानोत्तरकालविधानादेव सिद्धे समिध्यमानं समिद्धमि

तिपुनरुपादानात्। अतस्तदभावे निवर्त्तते अनिवृत्तिरितिकेचित्। मनोसिप्राजापत्यमितिस्रौवमाघार्यमाणं। आघारणमनुमंत्र
यतइतिशेषः। स्रुच्यमन्वारभ्यवागस्यैंद्रीत्यनुमंत्रयते। आघार्यमाणमाघारमित्यन्वयः। आघारयितुमन्वारंभ एवान्वारभः।
अनुमंत्रणवचनमन्वारंभार्थे मंत्रोमाशंकीति। देवाः पितरः ससन्यजइतिहोतृप्रवरेध्वर्युप्रवरेचप्रव्रीयमाणेजपतीतिशेषः।
प्रवरस्थानापन्नेपिसीदहोतरित्यत्रगोत्रऋषिसंबंधकीर्त्तनाभावान्नायंजपः। योहमस्मिससन्नूयजेयस्यास्मिननतमंतरेमी
तिलिंगविरोधात्। चतुर्होतारंव्याख्यायवसतमृनूनांप्रीणामीत्येतैः प्रतिमंत्रंप्रयाजानांहुतंहुतं। अनुमंत्रयतइतिशेषः। स
र्वप्रयाजशेषश्चतुर्होता अतोनप्रतिप्रयाजमावर्त्तते। एकोममवयंद्विष्मइत्येतेश्चप्रतिमंत्रं। हुतंहुतमनुमंत्रयतइत्यन्वयः।
योस्मान्नित्यादेः सर्वत्रानुषंगः। अग्नीषोमयो॰ भूयासमित्याज्यभागौ। हुतमनुमंत्रयेतेइतिशेषः। विहृतानुमंत्रणेवा। विहृ
तंव्यस्तमनुमंत्रणंययास्तोतथोक्तौ। अग्निनायज्ञश्चक्षुष्माभूयासमितिविहृतौ। यदाविहृतौदत्तदाताभ्यांपृथगनुमंत्रंयित राम
व्यौ। पंचहोतरंवदेत्पुरस्ताद्धविरवादानस्य। सर्वहविरर्थः पंचहोता। नतुप्रत्येकमावर्त्तते वीप्साभावात्। अग्नेरहंदेवयज्ययया ८
न्नादाभूयासमित्याग्नेयंहुतमनुमंत्रयते। दब्धिरसीत्युपांशुयाजमग्नीषोमयोरित्यग्नीषोमीयमिंद्राग्न्योरित्यैंद्राग्नंमिंद्रस्ये
त्यैंद्रंसान्नाय्यंमहेंद्रस्येतिमाहेंद्रंमग्नेः स्विष्टकृतइतिसौविष्टकृतंअग्नीषोमीयेत्युपांशुयाजेदब्धिरसीत्येवमंत्रोदब्धिरसीत्यु

पांशुयाजमितिवचः नात्रचलिंगविरोधोयागाभिधानात्। पुरस्तात्स्विष्टकृतोन्यदैवतान्येकेसमामनन्ति। प्राकृतेहुतानुमंत्रणस्त
माम्नायेस्विष्टकृन्मंत्रास्पूर्वंप्राकृतीभ्योन्यदेवतान्यपिवक्ष्यमाणानियजूंष्येकेशाखिनःसमामनंति किंचातःतानितुप्रकृताव
संभवात्। प्रकरणंबाधित्वालिंगानुरोधेनविकृतिषुनिवेशयितव्यानीत्याह। इंद्रस्ययाज्यासमिति। यथालिंगंवैकृतीदेवताइ
ष्टा अनुमंत्रयतइत्यर्थः। एवंचैकेषांमतेनैषांप्रत्यक्षाम्नानात्तत्वैषय्येतदेवत्येषुहविः। षुहविःसामान्यविरोधेय्येनान्येवानु
मंत्रणानिभवंतिनतुप्राकृतान्यूह्यंनेइंद्रस्येंद्रियावतोहमित्यैंद्राग्नविकारत्वादूहेनेवसिद्धेपागेमंत्रस्यार्थः। ऊहश्चेदमंत्रः॥
स्यादित्तिइतरेषांमतेनतुप्राकृतान्येवविकृतिषुयथार्थमूह्यंतइतिविवेकः। अथपूर्वमुक्तंमंत्रार्थः। वामदेवोयजूंषिद्यावा
पृथिव्योरहंदेवयज्ययोभयोर्लोकयोर्ऋध्यासं। भूमानंप्रतिष्ठांगमेयमित्येकेद्यावापृथिव्योर्देवयोरनेनयागेनाहमुभयोर्द्या
वापृथिव्योर्लोकयोर्ऋद्धिंप्राप्नुयां भूमानंमहिमानंप्रतिष्ठांचगच्छेयं। विश्वेषांदेवानामहंदेवयज्ययाप्राणैःसायुज्यंगमेयं। वि
श्वेषांदेवानामनेनदेवयागेनाहंप्राणैःसायुज्यंसहयोगंसंपूर्णमायुर्गच्छेयं। अर्यएमोहंदेवयज्ययास्वर्गलोकंगमेयं। निग
दव्याख्यातं। अन्यानिप्रागेवव्याख्यातानि। अग्निर्माद्दुरिष्टात्पात्विति प्राशित्रमवदीयमानंहविर्गणाद्दवदानेपिसकृद्देवामं
त्रः। यथाचैवंतथाचैवंब्रह्मत्वेव्याख्यातं। सुरूपवर्षवर्णएहीतीडां। अवदीयमानामित्यनुषंगःसकृदत्रापिमंत्रःपूर्ववद्वयस्ये

हिसूनृतएहीतीडापांउपांश्चपहवेसप्तदेवगवीर्जपतिचिदस्तिसूनरीरित्युच्चैरुपहवेसप्तमनुष्यगवीर्देवीर्दैवैरभिमा॰दिशन्तितिचादेवगव्य
भिधायिनोमंत्राःदेवगव्युच्यंते।तथामनुष्यगव्यःउपहूयमानांवायविडातेमानेतिहोतारमीक्षमाणावायुंमनसाध्यायेत्।वायोर्नेव
तसभूतस्येडामातेतिउपहूयमानेअनुमंत्रणरूपमंत्रार्थानुस्मरणमेववायुध्यानंतथाचब्राह्मणेवायुर्वत्सइतिप्रकृत्याक्तं।वायुंम
8 नस्यध्यायेन्मात्रेवत्सस्मुपावसृजतीतिमंत्रार्थादन्यद्वायुध्यानमित्येके।सामेसत्याशीरित्याद्यासीर्मऊर्जइति।जपतीतिशेषः।
अयंजपःसोमेष्टिष्वभवतेवाएकस्याआशिषोविद्यमानत्वात्।इडायाअहंदेवयज्ययापशुमान्भूयासमित्युपहूतः।अनुमंत्र
यतइतिशेषः।इडाधेनुःआगादितिभक्षायाह्रीयमाणायां।व्यक्तं।उक्तइडाभक्षोमार्जनंच।द्वयमेतदुक्तमाध्वर्यवे।इडेभागमि
तिइडाभक्षोमनोज्योतिरितिचमार्जनी।आध्वर्यवोक्तस्यपुनरनुक्रमणंप्रवत्स्यतोभक्षमार्जनयोरसंभवेपिमंत्रजपोयथास्या
दितितेनैवमननुक्तानामसंभवकार्याणांमंत्राणांजपाभावः।अध्रापिन्वस्वकल्पंतांमइतिबर्हिषिपुरोडाशमासन्नमभिमृशा राम
ति।चतुर्द्धाकृत्वासहनिहितंपुरोडाशंतंत्रेणाभिमृशति।अथैनंप्रतिदिशंव्यूहत्याशानांत्वाश्रब्राह्मणस्यास्तीति।व्यूहतिविभज्य ८
गमयतिसकृदुक्तेनमंत्रेणउपहूतोद्यौःपुण्यायेत्याग्नीध्रभागस्यवैशेषिकं।व्युहनमितिविपरिणामेनसंबंधः।पूर्वंतुव्यूहनंच।
तुर्णांभागानांसाधारणंइदंचाग्नीध्रभागस्यवैशेषिकमित्यर्थः।आग्नीध्रंभागस्येतिवचनादिदंव्यूहनमिदंब्रह्मणइत्यादिव्यादेश।

नंतरं द्रष्टव्यं। अध्वप्रिन्वस्वस्त्यंतर्वेद्या न्वाहार्यमासन्नमभिमृशतीयं स्थाली० मृत्युमिति च। प्रथममंत्रस्य सर्वत्राविकारो भागाभिधाना
त्। द्वितीयेस्याद्यपदचतुष्टयस्यौदनस्थाल्यभिधायिनोन्यत्र तदभावे लोपः सहस्रधाराक्षीयमाणशब्दयोश्च लिंगस्याविकारः
उक्तविशेषणत्वाद्विशेष्यस्त्वयथार्थमुह्यः। उक्तेः संप्रैषो न्वाहार्यस्य च दानं उक्तं इडा मक्षइति तद्व्याख्या। संप्रैषइति दक्षिणए तोत
रतः परीतेति द्वयोरपि ग्रहणं तथैव तत्र दर्शितत्वात्। एषा ते अग्ने समिदित्यानुयोजिकीं समिधमाधीयमानामनुमंत्रयत इति
शेषः। यं ते अग्ने चमा मित्याहितायामग्निं। अनुमंत्रयत उपतिष्ठते वा। वेदिं बर्हिः० हुत इति संमार्गान् हुतान् संमार्गामिती ध्मसन्न
हनानि तेषां च बहुत्वनिर्देश इध्मसन्नहने हुत इति चैनदस्तु हुतमिति च मंत्रानुकरणं द्रष्टव्यं। सप्त होतारं चदेत्पुरस्तादनूयाजानां मुप
दिष्टाद्वा। सप्तहोतुरनुयाजांगत्वादननुयाजे प्रायणीये तस्याभावः बर्हिषो हं देवयज्ययाप्रजावान् भूयासमित्येतैः प्रतिमंत्रमनुया
जान् हुतं हुतं। उभौ वाजवत्यौ जपतः। उभयोरपि यजमानाध्वर्युचकांडयोः पाठादिति भावः। अध्वर्योरपि चातुस्वर्यार्थमिती त्येके।
वसून् देवान्० अपि प्रेमिति प्रतिमंत्रं परिधीन ज्यमानान् मंड्रुं नांव बर्हिः यत्स्वाहेति प्रस्तरमज्यमानं। व्यक्तं। अग्नेरहमुज्जितिमनू
ज्जेषमिति यथालिंगं सूक्तवाकदेवताः। सूक्तवाके कीर्त्तिताः देवताः सूक्तवाकदेवतास्तत्तल्लिंगाभिरुज्जितिभिरुपतिष्ठते नुमंत्रयते
वा। यथालिंगमिति समाम्नायसिद्धानां मंत्राणां लिंगवशेन विनियोगादनाम्नानमंत्राया उपांशुयाजदेवताया आज्यपानां च नो।

ज्जित्योपस्थानंअथवातन्मंत्रयोरपिशाखांतरीयपाठेनुमीयतेनिर्वार्था। ---- दिष्टिमैंद्राग्नमंत्रस्यकृतसूक्तवाकदेवताइत्यवि
9 शेषवचनात्। सूक्तंवाकेयांयांदेवतामभिव्याहरन्तितांतांयजमानोनुमंत्रयतइतिसत्याषाढवचनाच्च। आज्यपानामप्रधानत्वा
नोज्जितिरित्येके। यदावास्यहोतानामगृह्णीयादथब्रूयादेमाअग्मान्नाशिषोदोहकामाइति। सोमेष्टिष्वाशिषएकत्वादेयम।
गोदाशीर्देहिकामेत्यूहः। सामसत्याआगच्छत्वितिसूक्तवाकस्य। शिष्यकलायकामयनेतस्यनामगृह्णातिअदः शब्दः स्थानेका
म्यनामग्रहणंअविकृतएवायंमंत्रःसोमेष्टिषु। राहित्येनत्वाग्निर्देवतांगमयत्वित्येतैः प्रतिमंत्रमग्नौधाप्रस्तरंप्रहीयमाणं। व्य
क्तं। दिवःखीलःमोअहंरंशुवमितिप्रस्तरतृणेप्रहीयमाणेजपतीतिशेषः। वितेमुंचामीतिपरिधिषुविमुच्यमानेषुपरिधिषु
देवतोद्देशात्विमुच्यमानेषुप्रक्षिप्यमाणेष्वितियावत्विमुच्यमानेष्वितिवचमेषवाअग्नेर्विमोकइतिब्राह्मणव्याचिख्यासा
यां। परिधियोगेपूर्वंयुनज्मित्वेतिपुरस्तस्याग्नेरिदानींपरिधिविमोकेवितेमुंचामीतिविमोकोभिधानमेवविमोकइति। विष्णो
:शंयोरितिशंयुवाकेपत्नन्नस्ते॰उपतेनमइतिच। शंयुवाकेनूच्यमानेजपतीत्यर्थः। इष्टोयज्ञःद्रविणेहागमेरितिसंस्रावंहुतं।। राम
व्यक्तं। इत्थंक्रमकसंस्रावांतयाजमानतंत्रसुगंधिभिः। सूक्तिप्रसूनैःपुष्णातुपुसमर्थांस्पुरुषोत्तमः।। छ।। इतिप्रयोगरत्नमालायांचतु ९
र्थप्रश्नेतृतीयःपटलः।। छ।। कर्मब्रह्मोध्वनीनस्यमंत्रिभूपतिभूपतेः। व्याचष्टेचौंडपाचार्यसंयाजादौपतिक्रियांसोमस्याहंदेव

यज्ञयासुरेतारेतोधिपीयेतियथालिंगंपत्नीसंयाजान्हुतंहुतं।देवपत्नीनांगृहपतेश्चोपरिष्टाद्वेतिपक्षाश्रयणंवाकादिव्यपायेतिसा
मोनमनुमंत्रणंमंत्रलिंगात्तराकायायाअहंपशुमान्भूयासमितिकाम्याःकाम्यग्रहणेनराकाद्यादेवताउपलक्ष्यतिनतुव्यावर्त्त
यतितेनाविशिष्टमनुमंत्रणंनित्यत्वेपिराकायायाअहंपशुमतीभूयासमितिपत्न्यनुमंत्रयते।व्यक्तं।इडास्मानु०वैश्वदेवीत्याज्ये
डां।घृतेनेसुदकाभिधानान्मांसेडायामप्यनूहः।तथाचब्राह्मणंवृष्टिर्वाइडांवृष्ट्यैवैनिक्रमणेघृतंप्रजाःसंजीवंतीःपिबंतीति।अं
तर्वेदिवेदंनिधायाभिमृशतिवेदोसीति।एतदभिमर्शनंपुरस्तात्स्विष्टकृल्लेपफलीकरणहोमाभ्यांपुराविदेयेतियद्यभ्याद्यस्या
भिध्यायेततस्यनामगृह्णीयात्तदेवास्यसर्वंवृङ्क्ते इतिविज्ञायते।तत्रविदेयेत्येतच्छन्दाःसूर्वभात्व्यस्यस्वयंयद्यद्वहिरण्याद्यभि
ध्यायेदिदंमेस्यादितितस्यनामगृह्णीयात्यथादेवदत्तस्यगांविदेयेत्यादितत्सर्वमेवास्यार्थादत्तइत्याहश्रुतिःअसतितुकामे
यथाम्नातोमंत्रः।यासरस्व०भूयास्मेतिफलीकरणहोमेहुतेमुखंविमृष्टे।मुखविमार्गोयंफलीकरणहोमसंयोगतदंगमतोनोष
धतंत्रास्वनिवर्त्तते।वसुर्यज्ञःआगच्छतितिसमिष्टयजुर्हुतमनुमंत्रयेते।यत्कामयतेतस्यनामगृह्णाति।व्यक्तं।संयत्तपतिराशि
षेतियजमानभागैर्प्राश्नातिदधिक्रावुणोअकारिषमितितिसायंदोहं।इदंहविरितिप्रातर्दोहं।इदंहविरितिसौत्रामणिपटितत्वा।
स्वाहाकारांतोमंत्रःसमग्रमंत्रस्यपागन्नायंब्राह्मणमंत्रःप्रकरणांतरपागत्।वतस्येतिइदंहविरित्येताद्वानेवेत्निकेचित्।नात्रा

ह्मणः सान्नाय्यं प्राश्नीयात्। अब्राह्मणाः क्षत्रियादयो न सान्नाय्ये ऽयजमानभागं प्राश्नंति। अंतर्वेदि प्रणीतास्वध्वर्युः संततामुदकधारां स्रा
वयति। प्रणीताविमोकानंतरमित्यर्थः सदसि सन्मे भूयादित्यानीयमानायां जपति। व्यक्तं। प्राच्यां दिशि देवा ऋत्विजो मार्जयंतामित्येतैर्यथा
लिंगं व्युक्षिप्य समुद्रं वः मत्स्य यदित्यंतर्वेदि शेषं निनीय यद्दस्मुते भूयास्मेति मुखं विमृष्टे यथालिंगं व्युक्षिप्य तत्तन्मंत्रे प्रकाशितायां दिशि
10 तेन तेन मंत्रेणापः सिक्त्वा मुखं विमार्ग्यं तर्वेदि निनीतोदकेन। उभौ कपालविमोचनं शेषं जपतः उभयोरपि यजमानाध्वर्य्वोः कांड्योः
पागादिति भावः विष्णोः क्रमासीति दक्षिणे वेद्यंते दक्षिणेन पदा चतुरो विष्णुक्रमान् प्राचः क्रामत्युत्तरमुत्तरं ज्यायांसमनतिहरन्सव्यं। वि
ष्णुक्रमानामतल्लिंगमंत्रविशिष्टाः पदनिक्षेपाः तां दक्षिणे वेदिसीम्नि क्रामति तेषु चोत्तरोत्तरं क्रममधिकांतरालं क्रामति। न कदाचित्स
व्यं पादं पुरस्तान्नयति। नाहवनीयमतिक्रामति। यत्राप्याहवनीयशीम्नः परतो वेदिः सोमपशुचातुर्मास्येषु तत्रापि न तमतिक्राम
ति। अवस्थाय चतुर्थं जपति। चतुर्थं तु क्रमं तूष्णीं क्रांत्वावस्थाय ततो मंत्रं जपति ततो मंत्रांते क्रामतीत्यर्थः। अथवा तृतीयं क्रमं क्रां राम
त्वा तत्रैवावस्थाय चतुर्थमंत्रं जपित्वा न तु तेन क्रामतीत्यर्थः। चतुरो विष्णुक्रमानिति तु मंत्राभिप्रायं द्रष्टव्यं कस्माद्विष्णोः क्रमत्वेनैषां क्र १०
माणां स्तवनात्तस्य चतुश्चतुर्थक्रमाभावक्तवचनाद्बौधायनादिभिर्यथात्। तीयचतुर्थमनुवर्त्तयतिन चतुर्थोपयक्रामतीत्यादि उक्ताः॥
स्वशाखास्थो विष्णुक्रमकल्पः अथापरो ऽशास्त्रीयो कश्चिद्दर्शयति विष्णुक्रामान्विष्णुनिक्रमानति मोक्षानिति व्यतिषक्तानेके समा

मनंतिविनिरूढा। नेके अयमर्थः प्राकृतेयजमानकांडेत्रीनेतानेके धीयतेव्यतिषक्तांश्चतान्यथाप्रथमं विष्णुक्रमपर्यायमुक्ता अथवि
ष्णुतिक्रमानतिमोक्षाणामाद्यौपर्यायौ ततो द्वितीयमुक्ता तेषामपि द्वितीयौ ततस्तृतीयमुक्ता तेषामपि तृतीयौ ततश्चतुर्थं विष्णुक्र॰
ममिति अतो तंतत्वेनानधीपानानिरूढानान्यान्योन्यसंसंकीर्णान धीयते यथात्म्यमाप्य विष्णुक्रमांस्ततो विष्णुतिक्रमांस्ततोती
मोक्षोनितितदेवमेतेपूर्वेण केवलविष्णुक्रमकल्पेन सहत्रयः कल्पा उक्ता भवंति केचित्तु विष्णुक्रमवद्विष्णुतिक्रमातिमोक्षानपि॰
तित्यानिष्णातेषांव्यतिषंगाव्यातिषंगमात्रविकल्पमिच्छंति तदयुक्तं। विष्णुक्रमवत्तेषांस्वरूपस्यान्यतो सिद्धेर्नतावत्तेषांश्रुति
तः सिद्धिः दर्शपूर्णमासमंत्रब्राह्मणप्रकरणयोः केवलविष्णुक्रमाणामाम्नानात् सूत्रेपितएवानंतरंनित्यवद्विहिता अनुदिता
श्चप्रदेशांतरेषु यथापूर्णपात्रं निनयति विष्णुक्रमान्क्राम तित्यादिकल्पांतरेषु त्वनुपात्ता एव विष्णुतिक्रमाद्यइति न कुतश्चि
दप्येषांस्वरूपसिद्धिं पश्यामः तस्माद्व्यतिषंगादिविशिष्टस्वरूपमेवैषां मंत्रे विकल्प्यत इति सूक्तमित्यस्मि केवलो विष्णुक्रमकल्प
इति अग्निनादेवेन पृतनाजयामीति विष्णुतिक्रमायेदेवायज्ञहनइत्यतिमोक्षाइतिव्यक्तं अगन्म सुवः सुवरगन्मेत्यादित्यमुप
तिष्ठत उर्वंनघ समूहतामिति चक्षुषा ख्यातं पूर्वेणादित्योपस्थानेन ऐंद्रीमावृतमन्वावर्तइति प्रदक्षिणमावर्ततेव्यक्तं यद्यभिचरेत् इ
दमहं आमुष्यायणस्य प्राणं निवेष्टयामीति दक्षिणस्य पदः पार्ष्णिं निमृज्जीयात् आमुष्यायणस्येति गोत्रनिर्देशः यथा देवद

तस्यगोतमस्येत्यादिपिबतःप्राबाहणिरित्यादिवत्पितृनिर्देश्यद्वयंश्यन्येनिमज्जीयात्प्रातव्यंपीड्यमानंबुध्वापार्ष्णींभूमिंनिपीडयेत्पु
ण्याभवंतुयाःपापीपीरित्युक्त्वा।समहंप्रजयासमयाप्रजतिपुनरुपावर्ततेस्वस्तिपुनरागच्छतीतिप्रतिनिवृत्तिवचनःपुनःशब्दःपुनरु
पावर्तते।प्रसव्यमावर्ततइत्यर्थः।तथोदङ्पर्यावर्तते।समहंप्रजयेतीतिबोधायनःसमिद्धोअग्नेमेदीदिहिदीध्यासमित्याहवनीयमु
पसमंधेय्येत्तंवसुमान्यज्ञोवसीयांभूयासमित्युपतिष्ठतेयोनःसपत्नकिंचनेतिचआहवनीयमित्यनुषंगःअग्नआयूंषिपव
सइत्याग्नियावमानीभ्यांगार्हपत्यमनुपतिष्ठतअग्नेगृहपतइतिमंत्रःशन्ंहिमाइत्यंतःपुत्रस्यनामगृह्णातितामाशिषमाशासतंतव
इत्यजातस्यामुष्माइतिजातस्यद्वेएतेयजुषीजाताजातयोःपुत्रयोर्नामग्रहणार्थेतयोःप्रथमेनप्रथमंजातस्यपुत्रस्यनामगृह्णातितं
तवइतिपरोक्षनाम्नावजन्मार्थंतेजस्वेवास्यब्रह्मवर्चसीपुत्राजायतइतिश्रुतेः।अथद्वितीयेनयजुषाजातस्यनामगृह्णातिअमुष्मा
इतितदीयनाम्नातत्वनसमृध्यर्थंतेयजएवास्मिन्ब्रह्मवर्चसंदधातीतिश्रुतेः।तेनजातस्याप्यमुत्रस्यपुत्रस्यनामगृह्णातितदेवंपुत्र
वतोनामग्रहणद्वयंभवतितद्यथा।तामाशिषमाशासेतंतवेज्योतिष्मतींतामाशिषशासेदेवदत्तायज्योतिष्मतीमितिअपुत्रस्यत्तुप्र राम
थममेवद्वितीयस्यासंभवात्।पुत्रवतोपिद्वितीयमेवानप्रथममितिकेचित्तदयुक्तंतंतवइत्यजातस्येत्यविशेषोक्तोनविष्यपुत्रार्थंपुत्र ११
वतोपितदनिवारणात्अजातपुत्रस्येत्यवचनाच्चयुक्तोक्तश्चसमुच्चयोबोधायनेन।तामाशिषमाशासेमुष्माअमुष्माइतियावतोस्यपु

नाजातामभवंतितंतवइतितंतवइत्तिबहुपुत्रत्वेतुसस्थानाविवृध्यानाम्नांग्रहणं।नत्वभ्यावृत्त्यायथोक्तंसत्पाठेन।बहुपुत्रः सर्वेषांपुत्राणांनामा
न्यनुद्रुत्यज्योतिष्मतीमित्यंततोवदधातीति।नद्येथा।नामाशिषमाशास्तरुद्राय्यविष्णवेसूर्यायज्योतिष्मतिमिति अकृतनामस्तुनक्षत्र
नामग्राह्यंनैवग्राह्यंपुत्राःपुत्रस्येतिवचनात्ज्योतिषेतंतवेमामानुषादितिप्रियपुत्रस्यनामगृह्णाति।असावित्यत्रसंबुध्यानामग्रहणं
प्रियस्यतस्येतिवचनात् प्रियत्वस्यचविद्यमानविषयत्वाद प्रियपुत्रस्यापुत्रस्यचकृत्स्नमंत्रलोपः।बहुपुत्रस्यचाभ्यावृत्तिः अनुमात
न्वचित्तन्नइत्येकवचनाद्दूहप्रतिषेधाच्चसमुच्चयस्त्रपूर्वाभ्यां।अग्नेवर्ह्वे० स्योनइतिदक्षिणाग्निंउपतिष्ठतइतिशेषः।ज्योतिषतंतवेत्यं
तवेद्युपनिशातिपूर्वंवंनामग्रहणं।व्याख्यातंपूर्वत्रयेण।ज्योतिरसितंतवइत्युपविश्यजपति।उपविश्यजयोपिनापुत्रंस्यमध्यमपुरु
षविरोधात्।वेदमुपस्थआधायश्रंतवेध्यासीनोत्तिमोक्षानुजपत्ति।वेदाधानमुपरिष्टाद्वेदस्तरणयक्षाश्रयणेनोक्तं।अन्यत्रतुवेद
तृणान्युपस्थआधायेतिसत्पाठोक्तंद्रष्टव्यं।अत्रवेदस्तरणंयजमानभागस्यचप्राशनंमेकेसमामनन्ति।यदात्रतदासहैवोभयो
रुत्कर्षोनान्यतरस्य।कस्त्वायुनक्तिसत्वाविमुंचत्वितियद्वंविमुंचत्ति।अर्थमनुसंधायमंत्रोच्चारणमेवविमोकः।अत्रकेचिद्योगयोग
वद्विहारमनुविक्षंते।अग्नेव्रतपतेव्रतमचारिषमितिव्रतंविसृजते।येयेयजुर्भिर्व्रतमुपेतस्तैरेवविसृजतेनकारमात्रमेवविशेषंमंत्रब्राह्म
णसूत्रेष्वेकस्यैवपागदेकेनैनविसर्गइत्येके।यज्ञोबभूवेतियज्ञस्यपुनरालंभंजपति।विकृतावपियत्रपुनःक्रियातत्रैवपुनरालंभस्यज

पोऽन्वर्थत्वात् यथापश्वाग्रयणादिषु यत्र तु न पुनः क्रियाप्रकृतावपि न तत्र जपः प्रायश्चित्तेषु पाथिकृतादिषु पुनः प्रयोगेपि न जपः अनपे
क्षितत्वात् पुनः प्रयोगस्य। गोमानिति प्राङुदेत्य गोमतीं जपति सर्वेष्टिपशुषु नित्यो गोमतीजपः। प्राङुदेत्य पुरोगत्वा। अत्र वा यजमा
12 नभागं प्राश्नीयात् व्यक्तं। यज्ञ शं च मे० संतिष्ठस्वेति। दर्शपूर्णमासाभ्यां सोमेन पशुना वेष्ट्वा जपति। अधिकारादेव सिद्धेः पुनः दर्श
पूर्णमासग्रहणं तद्विकारेषु मा भूदिति। वृष्टिरसि० उपागामिति। अपउपस्पृशति। स्पृष्ट्वेति यागपरिसमाप्तिपरत्वात् दर्शपूर्णमा
सयोः कालभेदेन प्रयागभेदः। उभयत्राप्युपस्पर्शनं। तदिदं सर्वयज्ञेषूपस्पर्शनं भवति पूर्ववद्यारव्येयं ब्राह्मणांस्तर्पयत वइति सं
प्रेष्यति। ब्राह्मणाः ऋत्विजः संन्निधानादशोद। नास्युरिष्टिनामिति इष्ट्यं गत यावा भोज्या ब्राह्मणाः स्तां स्तर्पयत वेतर्पयत भोज
नादिभिः एषां च तर्पणं यज्ञसमृध्यर्थं यज्ञमेव तर्पयामीति वाजसनेयिश्रुतिः। प्रवसनकाले विहाराभिमुखो यजमानं जपति। प्रवस
न्देशान्तरे वसन् स्वे स्वे काले औपवसथ्येहनि यजनीये च विहारदेशमभिमुखो यजमानाध्वर्यवकांडोक्तान् सर्वानपि यजमानमंत्रा
न् जपति। तदापानि तु कर्माण्यध्वर्युः करोति। तथा च भारद्वाजादयः। यानि संस्थस्य कर्माण्यध्वर्युस्तानि कुर्यादिति संस्थस्य कर्मा राम
णि कृतवर्थानि यानि तु संभवंति पुरुषार्थानीत्यग्न्युपस्पर्शनादीनि तानि स्वयमेव तत्र कुर्यात्। प्रचो विष्णुक्रमान् क्रामति दक्षिणवेद्यं १२
ताभावात् क्रीय एव नि विष्णुक्रमाः। माच विहाराभिमुखः। क्रमिष्यं तेत्यय मारंभः। प्राङुदेत्य गोमतीं जपति। प्रथमं प्राङुदेत्य ततो विहारा

भिमुख एव स्थितो जपति प्राग्वेवोक्तप्रयोगः॥ ॥ प्रवसन्यजमानां ततं त्रव्याख्यासुगंधिभिः॥ सूक्तिप्रसूनैः पुष्णातु पुमर्थान्
पुरुषोत्तमः॥ ॐ॥ संकल्पादि प्रवासांतपदार्थोक्तिसमुच्चलुः॥ चतुर्थो व्याकृतः प्रश्नो यजमानाभिधानवान्॥ ॥ इत्यापस्तं
बीयाध्वरतंत्रस्वतंत्रव्याख्यायां प्रयोगरत्नमालायां चतुर्थे प्रश्ने चतुर्थः पटलः॥ ॥ समाप्तश्चतुर्थप्रश्नः॥ ॐ॥ ॐ॥